21

बृहदश्व उवाच।

स नदीः पर्वतांश्चैव वनानि च सरांसि च।

अचिरेणातिचक्राम खेचरः खे चरन्निव॥ ३-७०-१ ॥

तथा प्रयाते तु रथे तदा भाङ्गस्वरिर्नृपः।

उत्तरीयमथापश्यद्भ्रष्टं परपुरंजयः॥ ३-७०-२ ॥

ततः स त्वरमाणस्तु पटे निपतिते तदा।

ग्रहीष्यामीति तं राजा नलमाह महामनाः॥ ३-७०-३ ॥

निगृह्णीष्व महाबुद्धे हयानेतान्महाजवान्।

वार्ष्णेयो यावदेतं मे पटमानयतामिति॥ ३-७०-४ ॥

नलस्तं प्रत्युवाचाथ दूरे भ्रष्टः पटस्तव।

योजनं समतिक्रान्तो न स शक्यस्त्वया पुनः॥ ३-७०-५ ॥

एवमुक्ते नलेनाथ तदा भाङ्गस्वरिर्नृपः।

आससाद वने राजन्फलवन्तं बिभीतकम्॥ ३-७०-६ ॥

bibhītaka, vibhītaka - Terminalia bellirica, растение с многочисленными ягодами;

तं दृष्ट्वा बाहुकं राजा त्वरमाणो ऽभ्यभाषत।

ममापि सूत पश्य त्वं संख्याने परमं बलम्॥ ३-७०-७ ॥

सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन।

नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित्॥ ३-७०-८ ॥

वृक्षे ऽस्मिन्यानि पर्णानि फलान्यपि च बाहुक।

पतितानि च यान्यत्र तत्रैकमधिकं शतम्।

एकपत्राधिकं पत्रं फलमेकं च बाहुक॥ ३-७०-९ ॥

पञ्च कोट्यो ऽथ पत्राणां द्वयोरपि च शाखयोः।

प्रचिनुह्यस्य शाखे द्वे याश्चाप्यन्याः प्रशाखिकाः।

आभ्यां फलसहस्रे द्वे पञ्चोनं शतमेव च॥ ३-७०-१० ॥

ततो रथादवप्लुत्य राजानं बाहुको ऽब्रवीत्।

परोक्षमिव मे राजन्कत्थसे शत्रुकर्शन॥ ३-७०-११ ॥

अथ ते गणिते राजन्विद्यते न परोक्षता।

प्रत्यक्षं ते महाराज गणयिष्ये बिभीतकम्॥ ३-७०-१२ ॥

अहं हि नाभिजानामि भवेदेवं न वेति च।

संख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप।
मुहूर्तमिव वार्ष्णेयो रश्मीन्यच्छतु वाजिनाम्॥ ३-७०-१३॥
तमब्रवीन्नृपः सूतं नायं कालो विलम्बितुम्।
बाहुकस्त्वब्रवीदेनं परं यत्नं समास्थितः॥ ३-७०-१४॥
प्रतीक्षस्व मुहूर्तं त्वमथ वा त्वरते भवान्।
एष याति शिवः पन्था याहि वार्ष्णेयसारथिः॥ ३-७०-१५॥
अब्रवीदृतुपर्णस्तं सान्त्वयन्कुरुनन्दन।
त्वमेव यन्ता नान्यो ऽस्ति पृथिव्यामपि बाहुक॥ ३-७०-१६॥
त्वत्कृते यातुमिच्छामि विदर्भान्हयकोविद।
शरणं त्वां प्रपन्नो ऽस्मि न विघ्नं कर्तुमर्हसि॥ ३-७०-१७॥
कामं च ते करिष्यामि यन्मां वक्ष्यसि बाहुक।
विदर्भान्यदि यात्वाद्य सूर्यं दर्शयितासि मे॥ ३-७०-१८॥
अथाब्रवीद्बाहुकस्तं संख्यायेमं बिभीतकम्।
ततो विदर्भान्यास्यामि कुरुष्वेदं वचो मम॥ ३-७०-१९॥
अकाम इव तं राजा गणयस्वेत्युवाच ह।
सो ऽवतीर्य रथात्तूर्णं शातयामास तं द्रुमम्॥ ३-७०-२०॥
ततः स विस्मयाविष्टो राजानमिदमब्रवीत्।
गणयित्वा यथोक्तानि तावन्त्येव फलानि च॥ ३-७०-२१॥
अत्यद्भुतमिदं राजन्दृष्टवानस्मि ते बलम्।
श्रोतुमिच्छामि तां विद्यां यथैतज्ज्ञायते नृप॥ ३-७०-२२॥
तमुवाच ततो राजा त्वरितो गमने तदा।
विद्ध्यक्षहृदयज्ञं मां संख्याने च विशारदम्॥ ३-७०-२३॥
बाहुकस्तमुवाचाथ देहि विद्यामिमां मम।
मत्तो ऽपि चाश्वहृदयं गृहाण पुरुषर्षभ॥ ३-७०-२४॥
ऋतुपर्णस्ततो राजा बाहुकं कार्यगौरवात्।
हयज्ञानस्य लोभाच्च तथेत्येवाब्रवीद्वचः॥ ३-७०-२५॥
यथेष्टं त्वं गृहाणेदमक्षाणां हृदयं परम्।
निक्षेपो मे ऽश्वहृदयं त्वयि तिष्ठतु बाहुक।
एवमुक्त्वा ददौ विद्यामृतुपर्णो नलाय वै॥ ३-७०-२६॥
तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः।

कर्कोटकविषं तीक्ष्णं मुखात्सततमुद्वमन्॥ ३-७०-२७॥

कलेस्तस्य तदार्तस्य शापाग्निः स विनिःसृतः।

स तेन कर्शितो राजा दीर्घकालमनात्मवान्॥ ३-७०-२८॥

ततो विषविमुक्तात्मा स्वरूपमकरोत्कलिः।

तं शप्तुमैच्छत्कुपितो निषधाधिपतिर्नलः॥ ३-७०-२९॥

तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः।

कोपं संयच्छ नृपते कीर्तिं दास्यामि ते पराम्॥ ३-७०-३०॥

इन्द्रसेनस्य जननी कुपिता माशपत्पुरा।

यदा त्वया परित्यक्ता ततो ऽहं भृशपीडितः॥ ३-७०-३१॥

अवसं त्वयि राजेन्द्र सुदुःखमपराजित।

विषेण नागराजस्य दह्यमानो दिवानिशम्॥ ३-७०-३२॥

ये च त्वां मनुजा लोके कीर्तयिष्यन्त्यतन्द्रिताः।

मत्प्रसूतं भयं तेषां न कदाचिद्भविष्यति॥ ३-७०-३३॥

एवमुक्तो नलो राजा न्ययच्छत्कोपमात्मनः।

ततो भीतः कलिः क्षिप्रं प्रविवेश बिभीतकम्।

कलिस्त्वन्येन नादृश्यत्कथयन्नैषधेन वै॥ ३-७०-३४॥

ततो गतज्वरो राजा नैषधः परवीरहा।

संप्रनष्टे कलौ राजन्संख्यायाथ फलान्युत॥ ३-७०-३५॥

मुदा परमया युक्तस्तेजसा च परेण ह।

रथमारुह्य तेजस्वी प्रययौ जवनैर्हयैः।

बिभीतकश्चाप्रशस्तः संवृत्तः कलिसंश्रयात्॥ ३-७०-३६॥

हयोत्तमानुत्पततो द्विजानिव पुनः पुनः।

नलः संचोदयामास प्रहृष्टेनान्तरात्मना॥ ३-७०-३७॥

विदर्भाभिमुखो राजा प्रययौ स महामनाः।

नले तु समतिक्रान्ते कलिरप्यगमद्गृहान्॥ ३-७०-३८॥

ततो गतज्वरो राजा नलो ऽभूत्पृथिवीपते।

विमुक्तः कलिना राजन्रूपमात्रवियोजितः॥ ३-७०-३९॥